॥ श्री विजयींद्रतीर्थ श्रीचरणकृत (पापमोचन) दुरितापहारस्तोत्रं ॥

सुकृतं तिलमात्रतुल्यमीश क्रियते नैव मयैकवत्सरेऽपि ।
अपि तु क्रियते हि सदाऽघपूगः प्रतियामं सकलेन्द्रियैर्मुकुंद ॥ १ ॥

न शिरश्चलतीश मे कदाऽपि श्रुतिजानंदभरेण सद्गुणानां ।
अपि तु प्रभुबंधुदुर्गुणानां श्रवणार्थं चलितं भवत्यशंकं ॥ २ ॥

श्रवणे श्रवणाय सत्कथाया न यतेते तव पुण्यकीर्तनस्य ।
अपि तु व्यभिचारलोकवार्ता श्रवणायैव महादरं प्रतातः ॥ ३ ॥

न ममाक्षियुगं प्रवर्तते श्रीभगवच्चास्त्राकुलावलोकनाय ।
अपि तु ध्रुवपाल नर्तकीनां गणिकानां परिनर्तनादिदृष्ट्यै ॥ ४ ॥

न हि नासिकया कदापि विष्णोः पदपद्मार्पितपुष्पगंधबुद्धिः ।
कमलेश भवामि किंतु विष्णोश्चरणानर्पित पुष्पगंधबुद्धिः ॥ ५ ॥

नृहरेच्युत माधवेश कृष्ण हरिगोविंद मुकुंदनामजातं ।
न हि कीर्तयतीह मे कुजिह्वाऽपि तु दुर्लिंगभगांकितानु शब्दान् ॥ ६ ॥

तव गेहवरावलेपनादिं न करौ मे कुरुतः कदाऽपि भक्त्या ।
अपि तूरुगुणार्ण दुष्टवस्तुग्रहणायैव मुकुंद किं तु कुर्मः ॥ ७ ॥

उदरं मम धिक् शठस्य विष्ण्वर्पितपूतान्न विवर्जितं नितांतं ।
यदपूततरा समर्पणीयाधमवृंताकपलांडु पूर्वभाजः ॥ ८ ॥

खलजारवधू गृहाणि नित्यं चरणाभ्यामनुयाम्यहं त्वराभ्यां ।
न तु माधव तावकालयांश्च प्रतियामीश महत्तमाग्रहोऽहम् ॥ ९ ॥

मन ऐव हरेऽखिलेंद्रियाणां वरमित्थं प्रमितं श्रुतिस्मृतिभ्यां ।
सुमनोजयिनोऽखिलेंद्रियाणां जय ऐवेति जनानुभूतिरस्ति ॥ १० ॥

मनसाऽच्युत कृष्ण तादृशेनाप्यनुचिंत्यैव भवंतमात्मभक्तान् ।
भववारिनिधेः सुतारयंतं भववार्धिं न हि तर्तुमस्ति यत्नः ॥ ११ ॥

मम पापचयस्य वासुदेवांतकलोकस्थितिरेव चेत्फलं तु ।
न सुखी सदृशोऽस्ति मे त्रिलोक्यां फलभावेन महत्तमोऽस्ति सिद्धं ॥ १२ ॥

न सुखानुभवाय पापकर्माण्यहमीशानुदिनं तनोमि किंतु ।
अघनाशयशः परीक्षणार्थं तव नाम्नामनुतापसिद्ध येवा ॥ १३ ॥

निजवासरुषा प्रदातुमार्तिं ह्यधिकां पापनियामकासुरेभ्यः ।
अशुभान्यपि कारयन् मया त्वं रमसे सर्वनियामकेति भाति ॥ १४ ॥

यदि कृष्ण कदाचनापि पुण्यं घटते पापमयस्य मेऽपि तत्तु ।
प्रबलाघचयैर्विहन्यते वा दुरितध्वंसकृतार्थमीश वा स्यात् ॥ १५ ॥

तदिहोभयतश्च पुण्यमूर्ते सुकृतं नो घटते मनागपीश ।
वद मे पुरतस्त्वतीव भीरोर्भगवन् कालभयापहतृपायं ॥ १६ ॥

अतुलं वरवैष्णवं सुजन्माच्युत दत्तं कृपया त्वयाऽप्यवाप्य ।
क्षणजीव्यपि कल्पगत्वबुद्ध्या पशुचंडालवदेव संचरामि ॥ १७ ॥

न तदस्ति शरीरिणां शताब्दायुशि शास्त्रप्रमितेऽपि किंचिदेव ।
भगवन् खलु तत्र रात्रिकालो जलहोमोपमतामुपैति नोऽलं ॥ १८ ॥

द्विदशाब्दयुगं दिवापि पूर्वोत्तरमीश स्थविरत्व शैशवाभ्यां ।
समयां प्रणयामि सर्वरोगैः बहुलीलाभिरपि प्रमूढबुद्ध्या ॥ १९ ॥

परिशेषित ईश मध्यकालः सुकृते भारतभूतले वसिष्टः ।
यदिहापि सदैव पापचित्ते मयि पश्चांत्यजयोश्च कोऽपराधः ॥ २० ॥

इह भारतभूतलेऽतिपुण्ये द्रविणस्त्रीसुतपूर्वकेषु मायाम् ।
अलमेकदिनं विमुच्य वा मे तव पादाब्जरतिं प्रदेहि देहि ॥ २१ ॥

रमयाऽप्यगणय्यवस्तुजातं द्विविधं प्राहुरमंदबुद्धिभाजः ।
तव सद्गुणजातमेकमन्यन्मम दुर्व्रदुरंतपापजातं ॥ २२ ॥

अतिसौख्यकराण्यलं परस्तात् न हि किंचित् श्रमसाध्यसाधनानि ।
श्रमभीरुरहं त्यजन्परत्रामितशोकानुभवी कथं भवामि ॥ २३ ॥

भुवि यद्यपि पापिनो वसंति श्रमभाजः पुरुषास्तथाऽपि कोऽपि ।
मम पापसमानपापकर्ता पुरुषो नास्ति हि नास्ति नास्ति ॥ २४ ॥

नतयो न कृताः प्रदक्षिणाश्च स्तुतयोऽपि ध्रुवमंतरेण दंभः ।
न गुरुः परिसेवितः सुभक्त्याशुभशास्त्राश्रवणं कथं ततः स्यात् ॥ २५ ॥

वचनैर्बहुभिर्मुकुंद किं ते श्रुण मे बीजवचो वदामि तुभ्यं ।
भुवनत्रयसंस्थितानि यानीश्वर पापानि वसंति मय्ययोग्ये ॥ २६ ॥

प्रकृते तदघव्रजात्प्रमुक्तिर्नभवेत्यैरपि ते दयां विनाऽध्य ।
करुणां कुरु मय्यतो मुरारे नतयस्ते कमलेश संत्वनंताः ॥ २७ ॥

विजयींद्रयतीश्वरो व्यतानीत् स्तुतिमेनां दुरितापहं मुरारेः ।
परमादरतः सदा पठेद्यो निखिलैः पापचयैर्भवेत्स मुक्तः ॥ २८ ॥

॥ इति श्रीविजयींद्रतीर्थ श्रीचरणकृतं पापमोचनस्तोत्रं दुरितापहारस्तोत्रं संपूर्णं ॥

॥ भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु ॥